# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2017**
**THIRD YEAR [BATCH 2015-18]**
**SANSKRIT [Honours]**

Date : 19/12/2017

Time : 11 am – 3 pm

**Paper : V**

Full Marks : 100

1. अन्यतरस्य मन्त्र**द्वयस्य** वङ्गानुवादः कार्यः। [2×5]

क) उप त्वाग्ने दिवेदिवे
दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि।।

ख) अहं सुवे पितरमस्य मूर्ध–
न्मम योनिरप्स्वन्तः समुद्रे।
ततो वि तिष्ठे भुवनानु विश्वो–
तामुं द्यां वर्ष्मणोप स्पृशामि।।

ग) समानी व आकूतिः
समाना हृदयानि वः।
समानमस्तु वो मनो
यथा वः सुसहासति।।

घ) अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे वि चष्टे सवितायमर्यः।।

2. **एकः** प्रश्नः समाधेयः। [1×10]

क) का दशतयी ? तत्रादिमसूक्तस्य कस्तावदृषिः ? किं छन्दः ? तत्र स्तूयमानाया देवतायाश्चारित्रिकवैशिष्ट्यं समासेनोपस्थापनीयम्। [1+1+1+7]

ख) अक्षसूक्तस्य विषयः समासेनोपस्थाप्यताम्। अद्यत्वे तस्य क उपयोगः ? [7+3]

3. ऋषिच्छन्दोदैवतनिर्देशपुरःसर**मेको** मन्त्रो व्याख्येयः। [1×6]

क) अग्ने यं यज्ञमध्वरं
विश्वतः परिभूरसि।
स इद्देवेषु गच्छति।।

ख) अहं रुद्राय धनुरा तनोमि
ब्रह्मद्विषे शरवे हन्तवा उ।
अहं जनाय समदं कृणो–
म्यहं द्यावापृथिवी आ विवेश।।

4. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×4]

क) वैयाकरणटिप्पणी**द्वयं** लेख्यम्। [2×2]

वक्षति, दाधार, ईळे, अहस्तासः।

ख) याज्ञिकदिशा टीका**द्वयं** विरचनीयम्। [2×2]

आधानम्, याज्या, अग्नीषोमप्रणयनम्, विशेषविनियोगः।

ग) **एकस्य** कस्यचित् सन्दर्भस्याशयः स्फुटीक्रियताम्। [1×4]

i) अभिप्लवषडहस्य मध्यवर्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' – इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

ii) अग्निमीले इति सूक्तं प्रातरनुवाके आग्नेयक्रतौ विनियुक्तम्।

5. 1(क) इत्यस्य 3(क) इत्यस्य **वा** पदपाठः प्रदेयः। [5]

6. कस्यचि**देकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]

क) वैदिकवाङ्मये उपसर्गप्रयोगवैचित्र्यं स्फुटीक्रियताम्। लौकिकतस्तस्य को भेदः? [7+3]

ख) छन्दसि लुङ्लकारस्य व्यवहार आलोच्यताम्।

ग) विषय**द्वयम**वलम्ब्य टीका**द्वयं** लेख्यम्।

वैदिकवाङ्मये लेड्लकारः, वैदिकसन्धिः, इतिकरणम्, पदपाठः।

7. अधोलिखितवैदिकपदानां **पञ्चानां** लौकिकपर्यायाः प्रदेया **देवनागरलिप्या** एव। [1×5]

पूर्वेभिः, विश्वा, आगमत्, इमसि, मूर्धन्, दृष्ट्वाय, दाधार, महित्वा, अश्ववत्, श्रुधि।

8. कस्यचि**देकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]

क) व्यसनशब्दस्य का व्युत्पत्तिः? मनुमुनिनयानुसारं कति तावद् व्यसनानि? तानि कथं परिहरणीयानीति वैशद्येन लेख्यम्। [1+2+7]

ख) युद्धनीतिविषये मनुमतमुपस्थाप्यताम्।

9. पद्य**मेकं** व्याख्यायताम्। [1×7]

क) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति।।

ख) अपि यत् सुकरं कर्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किमु राज्यं महोदयम्।।

10. **अन्यतरस्य** पद्यस्य वङ्गानुवादः कार्यः। [1×5]

क) स्वराष्ट्रे न्यायवृत्तः स्याद् भृशदण्डश्च शत्रुषु।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः।।

ख) यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः।।

11. विषय**मेक**मवलम्ब्य टी**कैका** रचनीया। [1×3]

तौर्यत्रिकम्, षाड्गुण्यम्।

12. **एक** प्रश्नः समाधेयः। [1×12]

क) त्रय्यामर्थशास्त्रकारमतमुपस्थापनीयम्।

ख) दूतेऽर्थशास्त्रकारमतमुपन्यसनीयम्।

13. कस्यचि**<u>देकस्या</u>**नुच्छेदस्य वङ्गानुवादः कार्यः। [1×7]

क) पितृपैतामहानमात्यान् कुर्वीत दृष्टापदानत्वात्। ते ह्येनमपचरन्तमपि न त्यजन्ति सगन्धत्वात्। अमानुषेष्वपि चैतद् दृश्यते – गावो ह्यसगन्धगोगणम् अतिक्रम्य सगन्धेष्वेवावतिष्ठन्त इति।

ख) सहाध्यायिनोऽमात्यान् कुर्वीत दृष्टशौचसामर्थ्यत्वादिति भारद्वाजः। ते ह्यस्य विश्वास्या भवन्तीति। नेति विशालाक्षः। सहक्रीडितत्वात् परिभवन्त्येनम्। ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत, समानशीलव्सनत्वात् ते ह्यस्य मर्मज्ञभयान्नापराध्यन्तीति।

14. विषय**<u>द्वय</u>**मवलम्ब्य संक्षिप्तटीका**<u>द्वयं</u>** विरचनीयम्। [2×3]

कापटिकः, मात्स्यन्यायः, पञ्चाङ्गो मन्त्रः, अर्थशास्त्रकारः।

——— × ———